# Pranagnihotra Upanishad

# પ્રાણાગ્નિહોત્રોપનિષત્

## Document Information

Text title : Pranagnihotra Upanishad

File name : pranagni.itx

Category : upanishhat, upanishad

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : March 23, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# પ્રાણાગ્નિહોત્રોપનિષત્

શરીરયજ્ઞસંશુદ્ધચિત્તસંજાતબોધતઃ ।
મુનયો યત્પદં યાન્તિ તદ્રામપદમાશ્રયે ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં
કરવાવહૈ ॥ તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથાતઃ સર્વોપનિષત્સારં સંસારજ્ઞાનાતીત-
મન્ત્રસૂક્તં શારીરયજ્ઞં વ્યાખ્યાસ્યામઃ । યસ્મિન્નેવ
પુરુષઃ શરીરે વિનાપ્યગ્નિહોત્રેણ વિનાપિ સાંખ્યયોગેન
સંસારવિમુક્તિર્ભવતીતિ । સ્વેન વિધિનાન્નં ભૂમૌ નિક્ષિપ્ય
યા ઓષધીઃ સોમરાજ્ઞીરિતિ તિસૃભિરન્નપત ઇતિ દ્વાભ્યા-
મનુમન્ત્રયતે । યા ઓષધયઃ સોમરાજ્ઞીર્બહ્વીઃ શતવિચક્ષણાઃ ।
બૃહસ્પતિપ્રસૂતાસ્તા નો મુઞ્ચત્વંહસઃ ॥ ૧॥

યાઃ ફલિનીર્યા અફલા અપુષ્પા યાશ્ચ પુષ્પિણીઃ ।
બૃહસ્પતિપ્રસૂતાસ્તા નો મુઞ્ચત્વંહસઃ ॥ ૨॥

જીવલા નઘારિષાં માતે બધ્નામોષધિમ્ ।
યાતયાયુ રુપાહરાદપ રક્ષાંસિ ચાતયાત્ ॥ ૩॥

અન્નપતેઽન્નસ્ય નો ધેહ્યનમીવસ્ય શુષ્મિણઃ ।
પ્રપ્રદાતારં તારિષ ઊર્જં નો ધેહિ દ્વિપદે ચતુષ્પદે ॥ ૪॥

યદન્નમગ્નિર્બહુધા વિરાદ્ધિ
રુદ્રૈઃ પ્રજગ્ધં યદિ વા પિશાચૈઃ ।
સર્વં તદીશાનો અભયં કૃણોતુ
શિવમીશાનાય સ્વાહા ॥ ૫॥

અન્તશ્ચરસિ ભૂતેષુ ગુહાયાં વિશ્વતોમુખઃ ।

ત્વં યજ્ઞાસ્ત્વં બ્રહ્મા ત્વં રુદ્રસ્તવં વિષ્ણુસ્ત્વં વષટ્કાર
આપો જ્યોતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃ સુવરોંનમઃ ।
આપઃ પુનન્તુ પૃથિવીં પૃથિવી પૂતા પુનાતુ મામ્ ।
પુનન્તુ બ્રહ્મણસ્પતિર્બ્રહ્મપૂતા પુનાતુ મામ્ ।
યદુચ્છિષ્ટમભોજ્યં યદ્વા દુશ્ચરિતં મમ ।
સર્વં પુનન્તુ મામાપોઽસતાં ચ પ્રતિગ્રહં સ્વાહા ।
અમૃતમસ્ય મૃતોપસ્તરણમસ્યમૃતં પ્રાણે જુહોમ્યમાશિષ્યાન્તોઽસિ ।
પ્રાણાય સ્વાહા । અપાનાય સ્વાહા । વ્યાનાય સ્વાહા । ઉદાનાય સ્વાહા ।
સમાનાય સ્વાહા । ઇતિ કનિષ્ઠિકાઙ્ગુલ્યાઙ્ગુષ્ઠેન ચ પ્રાણે જુહોતિ ।
અનામિકયાપાને । મધ્યમયા વ્યાને । સર્વાભિરુદાને । પ્રદેશિન્યા સમાને ।
તૂષ્ણીમેકામેકઋષૌ જુહોતિ । દ્વે આહવનીયે ।
એકાં દક્ષિણાગ્નૌ । એકાં ગાર્હપત્યે । એકાં સર્વપ્રાયશ્ચિત્તીયે ॥

અથાપિધાનમસ્યમૃતત્વાયોપસ્પૃશ્ય પુનરાદાય પુનરુપસ્પૃશેત્ ।
સ તે પ્રાણા વાઽઽપો ગૃહીત્વા હૃદયમન્વાલભ્ય જપેત્ ।
પ્રાણો અગ્નિઃ પરમાત્મા પઞ્ચવાયુભિરાવૃતઃ ।
અભયં સર્વભૂતેભ્યો ન મે ભીતિઃ કદાચન ॥ ૧॥

ઇતિ પ્રથમઃ ખણ્ડઃ ॥ ૧॥

વિશ્વોઽસિ વૈશ્વાનરો વિશ્વરૂપં ત્વયા ધાર્યતે
જાયમાનમ્ । વિશ્વં ત્વાહુતથઃ સર્વા યત્ર
બ્રહ્માઽમૃતોઽસિ । મહાનવોઽયં પુરુષો
યોઽઙ્ગુષ્ઠાગ્રે પ્રતિષ્ઠિતઃ । તમદ્ભિઃ પરિષિઞ્ચામિ
સોઽસ્યાન્તે અમૃતાય ચ । અનાવિત્યેષ બાહ્યાત્મા
ધ્યાયેતાગ્નિહોત્રં જોહોમીતિ । સર્વેષામેવ સૂનુર્ભવતિ ।
અસ્ય યજ્ઞપરિવૃતા આહુતીર્હોમયતિ । સ્વશરીરે યજ્ઞં
પરિવર્તયામીતિ । ચત્વારોઽગ્નયસ્તે કિંભાગધેયાઃ ।
તત્રસૂર્યોઽગ્નિર્નામ સૂર્યમણ્ડલાકૃતિઃ સહસ્રરશ્મિ-
પરિવૃત એકઋષિર્ભૂત્વા મૂર્ધનિ તિષ્ઠતિ । યસ્માદુક્તો
દર્શનાગ્નિર્નામ ચતુરાકૃતિરાહવનીયો ભૂત્વા મુખે તિષ્ઠતિ ।
શારીરોગ્નિર્નામ જરાપ્રણુદા હવિરવસ્કન્દતિ । અર્ધચન્દ્રાકૃતિ-
ર્દક્ષિણાગ્નિર્ભૂત્વા હૃદયે તિષ્ઠતિ તત્ર કોષ્ઠાગ્નિરિતિ ।
કોષ્ઠાગ્નિર્નામાશિતપીતલીઢખાદિતાનિ સમ્યગ્વ્યષ્ટ્યાં

શ્રપયિત્વા ગાર્હપત્યો ભૂત્વા નાભ્યાં તિષ્ઠતિ ।
પ્રાયશ્ચિત્તયસ્ત્વધસ્તાત્તિર્યક્ તિસ્રો હિમાંશુપ્રભાભિઃ
પ્રજનનકર્મા ॥

ઇતિ દ્વિતીયઃ ખણ્ડઃ ॥ ૨॥

અસ્ય શરીરયજ્ઞસ્ય યૂપરશનાશોભિતસ્ય
કો યજમાનઃ । કા પત્ની । કે ઋત્વિજઃ । કે સદસ્યાઃ ।
કાનિ યજ્ઞપાત્રાણિ । કાનિ હવીંષિ । કા વેદિઃ ।
કોત્તરવેદિઃ । કો દ્રોણકલશઃ । કો રથઃ । કઃ પશુઃ ।
કોઽધ્વર્યુઃ । કો હોતા । કો બ્રાહ્મણાચ્છંસી ।
કઃ પ્રતિપ્રસ્થાતા । કઃ પ્રસ્તોતા । કો મૈત્રાવરુણઃ ।
ક ઉદ્ગાતા । કા ધારાપોતા । કે દર્ભાઃ । કઃ સ્રુવઃ ।
કાજ્યસ્થાલી । કાવાઘારૌ । કાવાજ્યભાગૌ । કેઽત્ર
યાજાઃ । કે અનુયાજાઃ । કેડા । કઃ સૂક્તવાકઃ ।
કઃ શંયોર્વાકઃ । કા હિંસા । કે પત્નીસંયાજાઃ ।
કો યૂપઃ । કા રશના । કા ઇષ્ટયઃ । કા દક્ષિણા ।
કિમવભૃતમિતિ ॥

ઇતિ તૃતીયઃ ખણ્ડઃ ॥ ૩॥

અસ્ય શારીરયજ્ઞસ્ય યૂપરશનાશોભિતસ્યાત્મા યજમાનઃ ।
બુદ્ધિઃ પત્ની । વેદા મહર્ત્વિજઃ । અહઙ્કારોઽધ્વર્યુઃ । ચિત્તં
હોતા । પ્રાણો બ્રાહ્મણચ્છંસી । અપાનઃ પ્રતિપ્રસ્થાતા ।
વ્યાનઃ પ્રસ્તોતા । ઉદાન ઉદ્ગાતા । સમાનો મૈત્રવરુણઃ ।
શરીરં વેદિઃ । નાસિકોત્તરવેદિઃ । મૂર્ધા દ્રોણકલશઃ ।
પાદો રથઃ । દક્ષિણહસ્તઃ સ્રુવઃ । સવ્યહસ્ત આજ્યસ્થાલી ।
શ્રોત્રે આઘારૌ । ચક્ષુષી આજ્યભાગૌ । ગ્રીવા ધારાપોતા ।
તન્માત્રાણિ સદસ્યાઃ । મહાભૂતાનિ પ્રયાજાઃ । ભૂતાનિ
ગુણા અનુયાજાઃ । જિહ્વેડા । દન્તોષ્ઠૌ સૂક્તવાકઃ । તાલુઃ
શંયોર્વાકઃ । સ્મૃતિર્દયા ક્ષાન્તિરહિંસા પત્નીસંયાજાઃ ।
ઓઙ્કારો યૂપઃ । આશા રશના । મનો રથઃ । કામઃ પશુઃ ।
કેશા દર્ભાઃ । બુદ્ધીન્દ્રિયાણિ યજ્ઞપાત્રાણિ । કર્મેન્દ્રિયાણિ
હવીંષિ । અહિંસા ઇષ્ટયઃ । ત્યાગો દક્ષિણા । અવભૃતં

મરણાત્ । સર્વા હ્યસ્મિન્દેવતાઃ શરીરેઽધિસમાહિતાઃ ।
વારાણસ્યાં મૃતો વાપિ ઇદં વા બ્રહ્મ યઃ પઠેત્ । એકેન
જન્મના જન્તુર્મોક્ષં ચ પ્રાપ્નુયાદિતિ મોક્ષં ચ
પ્રાપ્નુયાદિત્યુપનિષત્ ॥ ૩॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ તત્સત્ ॥

ઇતિ પ્રાણાગ્નિહોત્રોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Pranagnihotra Upanishad*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*